अव्यक्तत्वस्य तत्त्वोक्तेस्तथात्वम्। सांख्यमतसिद्धे सत्त्वप्रधाने १४महत्तत्त्वे १५अहङ्कारतत्त्वे च "सात्त्विको राजसश्चैव तामसश्च त्रिधा महान्" सां०प्र० धृतवाक्यम्। "सात्त्विकमेकादशकं प्रवर्त्तते वैकृतादहङ्कारात्" सां०का० एकादशानां पूरणमेकादशकं मनः षोडशात्मकगणमध्ये सात्त्विकम्। अतस्तद्वैकृतात् सात्त्विकाहङ्काराज्जायत इत्यर्थः। "वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा। अहन्तत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत्। वैकारिकाश्च ये देवा अर्थाभिव्यञ्जनं यतः" सां०प्र०भा० वाक्यम्। १६अध्यवसायादौ च "अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्य्यम्। सात्त्विकमेतद्रूपं तामसमस्माद्विपर्य्यस्तम्" सां०का०। "सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्। भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्" सां०का० "प्रकाशलाघवाभ्यामेकादशक इन्द्रियगणः सात्त्विको वैकृतात् सात्त्विकादहङ्कारात् प्रवर्त्तते" तत्त्वकौ०।

**सादनी** स्त्री सादयति रोगान् अनया सद–णिच्–करणे ल्युट्–ङीप्। कटुक्यां राजनि०।

**सादि** पु० सद–इण्। १सारथौ हेमच० २योद्धरि उणादि० ३अवसन्ने त्रि० ४वायौ पु० संक्षिप्तसारः।

**सादिन्** पु० सद–णिनि। १अश्वारोहणकर्त्तरि अमरः। २गजारोहिणि ३रथारोहिणि च मेदि०। ४अवसन्ने त्रि० स्त्रियां ङीप्।

**सादृश्य** न० सदृशस्य भावः ष्यञ्। तद्भिन्नत्वे सति तद्गतभूयोधर्मरूपे उपमानधर्मे। तच्च सादृश्यं सप्तपदार्थातिरिक्तः पदार्थ इति मीमांसकाः। तन्मतमुक्तं मुक्तावल्यां "सादृश्यमतिरिक्तः पदार्थ इति मीमांसकाः"। तन्मतञ्च उपमानचिन्तामणौ निराकृतम् उपमानशब्दे १२३५ दृश्यम्। सादृश्यवाचका इवादिनिपाताः सदृशादिशब्दाश्च तत्र इवादिभिः निपातैः सादृश्यस्याभिधाने प्रतियोग्यनुयोगिनोः समानविभक्तिकत्वं, गौरिव गवय चन्द्रमिव मुखं पश्यतीत्यादि। अन्ये तु गवादिशब्दा एव गोसदृशे लाक्षणिकाः इवादिशब्दास्तथालक्षणायां तात्पर्य्यग्राहका इत्याहुः। तुल्योपमाभिन्नशब्दैस्तस्याभिधाने प्रतियोगिनि तृतीया षष्ठी च। तुल्योपमाभ्यां योगे तु षष्ठ्येव। सादृश्ये च एकस्य प्रतियोगिताऽन्यस्यानुयोगिता तत्र प्रतियोगिन उपमानत्वमनुयोगिन उपमेयत्वमिति। उपमानोपमेयभावश्च द्वयोः समत्वेऽपि प्रसिद्धस्यैवोपमानता। तत्र काव्ये केशादिस्तूनां कुत्रचिदुपमानतया वर्णनं युक्तं तद्विपरीतं कविकल्पलतायां यथा "वेण्याः सर्पादिभृङ्गाल्यः केशपाशस्य चामरः। नीलकण्ठकलापोऽपि, धम्मिल्लस्य विधुन्तुदः। सीमन्तस्य चाध्वदण्डौ ललाटस्याष्टमी विधुः। मकरश्च, कपोलस्य चन्द्रः स्यात् मुकुरः स्थली। भ्रुवोः खड्गधनुर्यष्टी रेखापल्लववल्लयः। दृशस्कोरहरिणशफरीमदिराखञ्जनाञ्जनम्। कुमुदं नीलमम्भोजं, स्मृतेर्दीपः सपाशकः। नासायाः शुकतुण्डं चंशाधोमुखतूणीरचञ्चवः। तिलप्रसूनदण्डौ चाधरस्य नवपल्लवः। बिम्बीफलं प्रवालं च, दन्तानां मौक्तिकावलिः। कुन्ददाड़िमबीजानि हीरकाश्च, स्मितस्य च। ज्योत्स्ना पुष्पाणि पीयूषं, श्वासस्याम्भोजसौरभम्। जिह्वायाश्चोड्नोले च शाखा भृङ्गपिकध्वनी। वीणावाद्यं मधु सुधा, मुखस्य चन्द्रमास्तथा। अम्भोजदर्पणौ चापि चिबुके दर्पणाख्यकम्। कण्ठस्य कम्बूरंसस्य कुम्भो बाह्वोस्तु वल्लरी। स्मृणालबहरीशाखापाशाः, पाणितलस्य तु। पल्लवस्याङ्गुलीनां तु पल्लवोऽम्भोजपत्रकम्। दीपो नवदलं चैव चम्पकं, नखदन्ततः। रत्नतारेन्दुपुष्पाणि, स्तनयोः कुड्मलौ घटौ। कुम्भिकुम्भौ गिरी चक्रौ बिल्वे, मध्यस्य वेदिका। सिंहमध्यं वज्रमध्यं क्षीणद्रव्यञ्च कथ्यते। उपमानानि रोमाल्याः रेखाशैवालवल्लयः। नीलकान्तमणीधूमलताद्विरदशुण्डकाः। नाभेरम्भोजमावर्त्तौ ह्रदो विवरकूपकौ। त्रिवल्या वीचिसोपाननिःश्रेण्यो, जघनस्य तु। पुलिनं पीठफलके, नितम्बस्य स्थलं पुनः। पर्वतः पृथिवी स्थूलोपलं वस्तु च यन्महत्। ऊर्वोः कदलिकास्तम्भकरौ करभस्तथा। जङ्घाद्वयस्य स्तम्भश्च पादस्य नवपल्लवः। अम्भोजं च गतेर्हंसखञ्जनद्विरदां गतिः। इमान्यन्यान्यपि स्त्रीणां पुंसामपि समानि तु। पुंसो रूपोपमानानां विशेषः कोऽपि कथ्यते। स्कन्धस्य वाजिवृषभस्कन्धौ बाह्वोरहीश्वरः। हस्तिहस्तस्तथा स्तम्भ अर्गलदण्डाश्च, वक्षसः। शिलापट्टकपाटे च प्रमत्ताश्वगतिर्गतेः। यशसः कुन्दचन्द्राद्याः शुभ्रवर्णास्तथा मताः। प्रतापस्याग्निसूर्य्यौ च वाडवाग्नी रवेः करः। जवापुष्पादयश्चैव रक्तवर्णपदार्थकाः। गुणस्य गौर्हंसबीजं संस्कारोऽङ्कुर एव च। शुक्लवर्णाः पदार्था ये तेऽप्यत्र परिकीर्त्तिताः। सामर्थ्यस्य महद्वस्तु पञ्चास्यविक्रमादिकम्। नीतेर्लतादिः माध्वीस्त्री ज्वाला दीपस्य कीर्त्तिता। आदेशस्योत्कटेच्छादिर्वेदवाक्यं गुरोर्वचः। शासनस्य स्थिरार्थाश्च प्रारब्धकर्म कीर्त्तितम्। पापस्य